ॐ

नमः स्तवच्छन्दभैरवाय ।

त्रिपञ्चनयनं देवं जटामुकुट मण्डितम् ।
चन्द्रकोटि प्रतीकाशं चन्द्रार्धकृतशेखरम् ॥१॥

पंचवक्त्रं विशालाक्षं सर्पयोनास मण्डितम् ।
वृश्चिकैरग्निवर्णाभैर्हरिणं तु विराजितम् ॥२॥

कपालमालाभरणं खड्गखेटकधारिणम् ।
पाशाङ्कुशधरं देवं शरहस्तं पिनकिनम् ॥३॥

वरदाभयहस्तं च मुण्डखट्वाङ्गधारिणम् ।
वीणाडमरुहस्तं च दण्डहस्तं त्रिशूलिनम् ॥४॥

वज्रदण्ड कृपाणाढ्यं परशवायुधहस्तकम् ।
मुद्गरेण विचित्रेण वर्तुलेन विराजितम् ॥५॥

सिंह चर्म परीधानं गजचर्मोत्तरीयकम् ।
अष्टादशभुजं देवं नीलकण्ठं सुतेजसम् ॥६॥

ऊर्ध्ववक्त्रं महेशानि स्फटिकाभं विचिन्तयेत् ।
आपीतं पूर्ववक्त्रं तु नीलोत्पलदल प्रभम् ॥७॥

दक्षिणं तु विजानीयाद्धामं चैव विचिन्तयेत् ।
दाडिमीकुसुमप्रख्यं कुङ्कुमादकसंनिभम् ॥८॥

चन्द्रार्बुद प्रतीकाशं पश्चिमं तु विचिन्तयेत् ।
स्वच्छन्द भैरवं देवं सर्वकामफलप्रदम् ॥९॥

ध्यायते यस्तु युक्तात्मा क्षिप्रं सिध्यति मानवः ।
या सा पूर्व गया ख्याता प्रदोरी शक्तिरुत्तमा ॥१०॥

भैरवं पूजयित्वा तु तस्योत्सङ्गे तु तां न्यसेत् ।
यादृशं भैरवं रूपं भैरव्यास्तादृगेव हि ॥११॥

ईषत्करालवदनां गम्भीरतिपुलस्वनाम् ।
प्रसन्नास्यां सदा ध्यायेद् भैरवीं तिस्मितेक्षणाम् ॥१२॥

ॐ

श्री बहुरूपगर्भस्तोत्रम्

ॐ नमश्चण्डिकायै स्वाहा ।

ब्रह्मादिकारणातीतं स्वशक्त्यानन्तनिर्भरम् ।
जगामि परमेशानं स्तच्चण्डवीरनायकम् ॥१॥
कैलासशिखरासीनं देवं देवं जगद्गुरुम् ।
पप्रच्छ प्रणता देवी शैलेन्द्रं त्रिजगन्मयम् ॥२॥

श्री देव्युवाच

प्रायश्चित्तेषु सर्वेषु समयोल्लङ्घनेषु च ।
महाभयेषु घोरेषु तीव्रोपद्रवभूमिषु ॥३॥
छिद्रस्थानेषु सर्वेषु सङ्कटेषु तटस्थयोः ।
येनाचारेण रहितो निर्दोषश्च भवेन्नरः ॥४॥

श्री भैरव उवाच

शृणु देवि परं गुह्यं रहस्यं परमाद्भुतम् ।
सर्वपाप प्रशमनं सर्वदुःख निवारणम् ॥५॥
प्रायश्चित्तेषु सर्वेषु दीक्षेष्वपि विमोचनम् ।
सर्वछिद्रापहरणं सर्वार्तिनिवारकम् ॥६॥

समयोत्क्रमणे घोरे जपोदेवं विमोचनम्।
भोग मोक्षप्रदं देवि सर्वसिद्धिफलप्रदम् ॥७॥
शतजाप्येन शुद्धान्ति महापातकिनोऽपिये।
तदर्धं पातकं हन्ति तत्पादेनोपपातकम् ॥८॥
कायिकं वाचकं चैव मानसं स्पर्शदोषजम्।
प्रमादादिच्छया वापि सकृज्जाप्येन शुद्धयति ॥९॥
यागारम्भे च यागान्ते पठितव्यं प्रयत्नतः।
नित्ये नैमित्तिके काम्ये परस्याप्यात्मनोऽपिता ॥१०॥
निश्छिद्रकरणं प्रोक्तं स्वभावपरिपूरणम्।
द्रव्यहीने मंत्रहीने यज्ञयोगविवर्जिते ॥११॥
भक्ति श्रद्धाविरहिते शुद्धिशून्ये तिरोधतः।
मनोविक्षेपदोषे च विलोपे पशुदीक्षिते ॥१२॥
विधिहीने प्रमादे च जप्तव्यं सर्वकर्मसु।
नातः परतरो मन्त्रो नातः परतरा स्तुतिः ॥१३॥

नातः परतरं चान्यत्स्तवप्रत्यङ्गिरा प्रिये ।
इयं समयतिद्दानां राजराजेश्वरीश्वरि ॥१४॥
परमाध्यायनं देवि श्रीरतस्य प्रकीर्तितम् ।
त्रीणं सर्वदेवानां सर्वसौभाग्यतर्द्धनम् ॥१५॥
स्तवराजमिमं पुण्यं शृण्वण्वानहिता प्रिये ॥१६॥

अस्य श्रीबहुरूपाभट्टारकस्तोत्रस्य
श्रीवामदेव ऋषिः, अनुष्टुप्छन्दः,
श्री बहुरूप भट्टारको देवता, आत्मनो वाञ्छितः
कार्यो पार्जित पापनिवारणार्थं चतुर्वर्गसिद्ध्यर्थं
पाठे विनियोगः ।
ओंकारमन्त्रेण न्यासं कृत्वा प्राणायामं कुर्यात् ।

अथ ध्यानम्

वामे कोटकपाशशार्ङ्ग तिलस-
दण्डं च वीणाण्टिके
बिभ्राणं दवजमुद्गरौ स्वनिभदे-
व्यङ्कं कुठारं करे।
देक्षेस्यङ्कुशकन्दले गुडभक-
न्वज्रत्रिशलाभयान्
रुद्रस्थं शरवक्त्रमिन्दुधवलं
स्वच्छन्दनाथं स्तुमः॥

अथ गायत्री

ॐ बहुरूपाय विद्महे कोटराक्षायधीमहि
तन्नोऽघोरः प्रचोदयात् ॥३॥

मूलं

ओम् घोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यश्च
सर्वतः शर्व सर्वेभ्यो नमस्ते रुद्ररूपेभ्यः ॥१०८॥

ओं नमः परमार्थाय शान्तिने परमात्मने ।
शिवाय परशान्तनिरानन्दपदाय ते ॥१॥
अनाख्यापदवीयाय प्रभवे लिङ्गहेतवे ।
महासामान्यरूपाय सत्तामात्रैकरूपिणे ॥२॥
घोषादिदशधाशब्दबीजभूताय शाश्वते ।
नमः शान्तो ग्घोरादिमन्त्रसन्दर्भजन्मिने ॥३॥
रेवत्यङ्गतिस्त्रम्भसमाश्लेषतिलकारिणे ।
नमः सामरसास्वादपरानन्दोपभोगिने ॥४॥
भोगपाणे नमस्तुभ्यं योगीशैः पूजितात्मने ।
द्वयनिर्दलनाक्षोभसमुल्लासितमूर्तये ॥५॥
घूरत्प्रसरितक्षोभतिरोष्टासितज्जन्तवे ।
नमो मायारतक्षोभ स्थाणवे परमेष्ठिने ॥६॥

घोरसंसार संभोगदीर्घिने स्थितिकारिणे।
कलादिक्षितिपर्यन्त पालिने विश्वे नमः ॥७॥

रेहणाय महामोहध्वांतविध्वंसहेतवे।
हृदयाम्भोज संकोच भेदिने शिवभानवे ॥८॥
भोग मोक्षफल प्राप्ति हेतु योग विधायिने।
नमः परमनिर्वाणदायिने चन्द्रमौलये ॥९॥
घोषाय सर्वमन्त्राणां सर्वताड्मय मूर्तये।
नमः सर्वाय शर्वाय सर्वचेष्टा वहारिणे ॥१०॥
स्वाभाय स्वान्ताय नमस्ते शवरात्मिने।
नित्याय सुप्रबुद्धाय सर्वान्तरतमायते ॥११॥
घोषाय परमानन्दान्तश्चराय स्वचराय ते।
नमो वाक्पतये तुभ्यं भवाय भवभेदिने ॥१२॥
रमणाय रतीशाङ्गदाहिने चित्रकर्मणे।
नमः शैलसुताधर्त्रे विश्वकर्त्रे महात्मने ॥१३॥

तमः पारप्रतिष्ठाय सर्वान्तपदगाय ते ।
नमः समस्त तत्वाद्ध्व व्यापिने चित्स्वरूपिणे ॥१४॥

रुद्राय रुद्राय नमस्ते रूपरूपिणे ।
परापरपरिस्पन्दमन्दिराय नमो नमः ॥१५॥

भरितखिलविश्वाय योगिगम्याय योगिने ।
नमः सर्वेश्वरेशाय महाहँसाय शम्भवे ॥१६॥

चर्च्याय चर्चनीयाय चर्चकाय चरायते ।
रवीन्दुसँधिसँस्थाय महाचक्रेश ते नमः ॥१७॥

सर्वानुस्यूतरूपाय सर्वाच्छादकशक्तये ।
सर्वभक्षाय सर्वाय नमस्ते सर्ववेदिने ॥१८॥

रम्याय वल्गभाक्रान्तदेहार्धाय विनोदिते ।
नमः प्रपन्नदुष्प्राप सौभाग्य फलदायिने ॥१९॥

तन्महेशाय तत्त्वार्थवेदिने भववेदिने ।
महाभैरवनाथाय भक्तिगम्याय ते नमः ॥२०॥

शक्तिगर्भप्रबोधाय शरण्यायाशरिणे ।
शान्तिपुष्ट्यादिसाध्यार्थसाधकायनमोऽस्तु ॥२१॥

स्वत्कुण्डलिनीगर्भप्रबोधप्राप्तशक्तये ।
उत्स्फोटनापटुप्रौढपरमाक्षरमूर्तये ॥२२॥

समस्तव्यस्तसंग्रस्तरश्मिजालोदरात्मने ।
नमस्तुभ्यं महामीनरूपिणे विश्वगर्भिणे ॥२३॥

रेवारणिसमुद्भूतवह्निज्वालावभारिती ।
घनीभूतविकल्पात्मविश्वबन्धविशेदिते ॥२४॥

भोगिनीस्यन्दनारूढिप्रौढिमालब्धगर्विणे ।
नमस्ते सर्वभक्ष्याय परमामृतनाभिने ॥२५॥

णफकोटिसमावेशभरितात्मितसृष्टये ।
नमः शक्तिशरीराय कोटिद्वितयसङ्गिने ॥२६॥

महामोहमनाक्रान्तजीवतर्गावबोधिने ।
महेश्वराय जगतां नमः कारणबन्धवे ॥२७॥

स्तेनोन्मूलनदक्षैकस्मृतये विश्वमूर्तये।
नमस्तेऽस्तु महादेवनाम्ने परस्वधात्मने॥२८॥

रुद्रात्मिणे महावीर्यरुरुवंशविनाशिने।
रुद्राय द्रावितारिष्टबन्धनाय नमोऽस्तु ते॥२९॥

द्रवत्पररसास्वादचर्वणेद्युक्तशक्तये।
नमस्तेदृशपूज्याय सर्वकारणहेतवे॥३०॥

रूपातीत नमस्तुभ्यं नमस्ते बहुरूपिणे।
त्र्यम्बकाय त्रिधामान्तश्चारिणे चित्रचक्षुषे॥३१॥

पेशलोपायलभ्याय भक्तिभाजां महात्मनाम्।
दुर्लभाय मलाक्रान्तचेतसां तु नमो नमः॥३२॥

भवप्रदाय दुष्टानां भवाय भवभेदिने।
भव्यानां तन्मयानां तु सर्वदाय नमो नमः॥३३॥